Postal Regd.No. GAMC- 1553/2022-2024

ISSN 2454-6313

संस्कृत-

# साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १८ अङ्क : २१२
जान्युआरी - २०२४

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### सजीवं कर्म

अस्माकं पृथिव्यां बहवः देशाः कर्मप्रधानाः वर्तन्ते । तत्रापि जपानदेशस्य कर्मप्राधान्यं प्रसिद्धम् एव । कर्मणि प्रसक्ताः तत्रत्याः जनाः प्रभूतम् उत्पादनं कुर्वाणाः अपि सुखवञ्चिताः दृश्यन्ते । तेषां जीवने वैभवे सत्यपि शान्तेः अभावः दृश्यते । कर्मठता रोगः न भवेत् इत्यपि चिन्तनीयम् । अपि च यदा कर्मणि व्यसनं भवति तदा तत् कर्म शनैः शनैः निर्जीवं भवति । तादृशं कर्म उद्वेगं जनयति । उद्विग्नः मनुष्यः आनन्दविमुखः भवति । सजीवं कर्म अर्थात् मधुरं कर्म – आनन्दमयं कर्म । अतः एव अस्माकं कर्म सजीवं कथं भवेत् इति नितरां चिन्तनीयम् ।

अस्माकं कर्मणः माधुर्यं प्रोन्नतं शिखरं प्राप्नुयात् । किन्तु प्रश्नः उद्भवति – एवं कथं भवेत् ? सामान्यतः मनुष्यस्य धारणा वर्तते यत् यस्मिन् कर्मणि द्रव्यलाभः भवति तदेव कर्म माधुर्यस्य हेतुः भवितुम् अर्हति । परन्तु तथा नास्ति । क्रीडां कुर्वतां बालकानां कोऽपि द्रव्यलाभः नास्ति । तथापि ते आकण्ठम् आनन्दं पातुं शक्नुवन्ति । वस्तुतः मनोरमं कर्म आनन्दमयं भवति एव । एतादृशानि कर्माणि जीवने आस्वादनीयानि ।

माता अपि एतं स्वादम् अनुभवति । मातृत्वस्य माधुर्यम् अनुपमम् । मातुः जीवने उपर्युक्तः अनुभवः पदे पदे प्रकटीभवति । यः मनुष्यः द्रव्यलाभेन विना किमपि कर्तुं न उत्सहते सः एतत् सर्वं ज्ञातुं न शक्नोति । परन्तु कविः, कलावित्, कृषीवलः, ऋषिः वा ज्ञातुं शक्नोति । तथापि आधिक्येन तु माता एव ज्ञातुं शक्नोति ।

कर्मणः माधुर्यम् आस्वादयितुम् उत्साहिनां खलु इतोऽपि एकः विकल्पः विचारपथम् आयाति । जीवनयात्रायां, किञ्चित् पूर्वमेव उद्योगात् निवृत्तिं प्राप्य, द्रव्यलाभरहिते कर्मणि मनः लम्बनीयम् । एषा खलु वानप्रस्थवृत्तिः । जीवनस्य सन्ध्याकालं यावत् धनार्थं मूषकधावनं कुर्वन्तः लुब्धाः जनाः जीवनस्य माधुर्यं प्राप्तुं न शक्नुवन्ति ।

प्रत्येकं कर्म आनन्दमयं भवेत् चेत्, ततः उत्पादनम् अपि गुणवत्तां प्राप्नुयात् । यतो हि प्रसन्नेन चित्तेन कृतस्य कर्मणः फलम् अपि प्रसन्नम् एव भवति ।

## गर्वस्य फलम्

**– जातककथा**

काशीराज्यं ब्रह्मदत्तः यदा परिपालयति स्म तदा गुत्सकः नाम वणिक् सन् जन्म प्राप्तवान् आसीत् बोधिसत्त्वः। षोडशे एव वयसि सः असदृशवैणिकरूपेण ख्यातिं प्राप्तवान्। जम्बूद्वीपे एव तत्सदृशः वैणिकः न आसीत्। काशीराजः तम् आस्थानवैणिकरूपेण नियुक्तवान्। कदाचित् काशीराज्यीयाः केचन वणिजः वाणिज्यार्थम् उज्जयिनीं गतवन्तः। गुत्सकस्य कारणतः काशीराज्ये प्रायः सर्वे वीणायाम् अभिरुचिमन्तः जाताः आसन्।

काशीवणिजः उज्जयिनीस्थान् वणिजः अवदन् – ''वयं वीणावादनं श्रोतुम् इच्छामः। एतस्य नगरस्य श्रेष्ठान् वैणिकान् निमन्त्र्य वीणावादनं व्यवस्थापयन्तु भवन्तः। एतस्य निमित्तं यः व्ययः भवेत् तं वयं वक्ष्यामः'' इति।

उज्जयिन्यां स्थितेषु वैणिकेषु मूर्तेशः सुप्रसिद्धः आसीत्। अतः काशीवणिजां मनोरञ्जनार्थं तस्य वाद्यगोष्ठी आयोजिता उज्जयिनीवणिग्भिः। मूर्तेशः वीणां स्वीकृत्य वणिजाम् आवासं गतवान्। वीणायाः तन्त्रीः समीकृत्य सः झङ्कारं कृतवान्। दीर्घकालं यावत् तेन वीणावादनं कृतम्। तथापि काशीवणिजां मुखे तु अल्पः अपि सन्तोषः न दृष्टः।

ततः तेन कानिचन गीतानि श्रावितानि। तथापि काशीवणिजां मुखे तु सन्तुष्टिरेखा अपि न उत्पन्ना।

अन्ते मूर्तेशः विषादेन तान् उक्तवान् – ''महाशयाः! मया आ बहोः कालात् वीणावादनं कृतम् तथापि भवतां मुखे तोषस्य रेखा अपि न दृष्टा। किं मम वीणावादनं भवद्भ्यः न अरोचत?'' इति। एतत् श्रुत्वा काशीवणिजः परस्परं मुखं दृष्टवन्तः। ततः कश्चित् वणिक् उत्थाय अवदत् – ''एतावत्पर्यन्तं किं भवान् वीणां वादयन् आसीत्? अहो, आश्चर्याय एतत्। वयं तु चिन्तितवन्तः आस्म यत् भवान् श्रुतिं समीकुर्वन् स्यात्'' इति।

ततः अपरः उत्थाय अवदत् – ''वयं चिन्तितवन्तः आस्म यत् वीणा सम्यक् नास्तीत्यतः भवान् तां पुनः पुनः परीक्षमाणः अस्ति इति। कृपया भवता क्षन्तव्याः वयम्'' इति। एतत् श्रुतवतः मूर्तेशस्य मुखं विच्छायं जातम्। सः विषादेन अवदत् – ''इतः पूर्वं भवद्भिः कस्यचित् महावैणिकस्य वीणावादनं श्रुतं स्यात्। अतः भवद्भ्यः मम वीणावादनं न अरोचत। कृपया तस्य महावैणिकस्य नाम उच्यताम्'' इति।

''किं भवता काशीराज्यस्य आस्थानवैणिकस्य गुत्सकस्य नाम न श्रुतम्?'' इति अपृच्छन् वणिजः।

''किं सः महावैणिकः?'' – मूर्तेशः अपृच्छत्।

''तस्य कौशलस्य पुरतः भवतः वीणावादनं तु बालिशचेष्टा एव'' इति अवदन् वणिजः।

''गुत्सकसदृशः वैणिकः यावत् अहं न भवामि तावत् नास्ति मम चित्तशान्तिः विश्रान्तिः वा। एतदवसरे भवद्भिः मह्यं किमपि दातव्यं नास्ति'' इति उक्त्वा मूर्तेशः ततः निर्गतवान्।

तस्मिन् एव दिने सः गृहात् प्रस्थाय अचिरात् एव काशीनगरं प्राप्य बोधिसत्त्वस्य गृहं गतवान्।

बोधिसत्त्वः तम् अपृच्छत्– ''वत्स! कः भवान्? किमर्थम् अत्र आगतं भवता?'' इति।

''श्रीमन्! अहमस्मि उज्जयिन्याः निवासी। मम नाम मूर्तेशः इति। भवत्तः वीणावादनम् अध्येतव्यम् इति उद्देशेन मया अत्र आगतम्। यदि भवतः अनुग्रहः स्यात् तर्हि कालान्तरे भवत्सदृशत्वं प्राप्तव्यम् इति मम इच्छा'' इति अवदत् मूर्तेशः। बोधिसत्त्वः मूर्तेशं वीणावादनस्य बोधनं सहर्षम् अङ्गीकृतवान्। मूर्तेशः प्रतिदिनं बोधिसत्त्वस्य गृहे वीणायाः अभ्यासं करोति स्म तेन सह आस्थानं गच्छति स्म अपि। कानिचन वर्षाणि अतीतानि।

कदाचित् बोधिसत्त्वः मूर्तेशम् अवदत् – ''वत्स ! मया यद्यत् ज्ञायते तत्सर्वं बोधितम् । अतः इतः परं भवान् स्वगृहं गन्तुम् अर्हति'' इति । किन्तु मूर्तेशः उज्जयिनीं प्रति गमनं न इच्छति स्म । 'तत्र मम विद्यायाः आदरः न्यूनः इति चिन्तयति स्म सः । उज्जयिन्यां तु अतिसामान्यकौशलवान् अपि अहं महाकलाकारत्वेन परिगण्यमानः आसम् । अतः किं तत्र स्थित्या ? कथमपि यदि काश्याम् एव मया आस्थाने पदं प्राप्येत तर्हि मम गौरवं वर्धेत । इदानीं मम पाण्डित्यं तु बोधिसत्त्वस्य पाण्डित्येन समम् अस्ति एव । बोधिसत्त्वः तु इदानीं महावृद्धः जातः अस्ति अपि । अतः काशीराज्यस्य आस्थाने स्थानप्राप्तिः मम क्लेशाय न स्यात्' इति अचिन्तयत् सः ।

ततः सः कदाचित् बोधिसत्त्वम् अवदत् – ''श्रीमन् ! अहम् उज्जयिनीं प्रतिगन्तुं न इच्छामि । अहं भवत्तुल्यः अस्मि इति यदि भवान् भावयति तर्हि राजास्थाने मह्यं स्थानं दापयतु कृपया'' इति ।

अनन्तरदिने बोधिसत्त्वः राजानम् एतम् अंशम् अवदत् ।

तदा राजा क्षणकालं विचिन्त्य अवदत् ''मूर्तेशः आ बहोः कालतः भवतः शिष्यः अस्ति । अतः तम् अहम् अवश्यम् आस्थानपण्डितत्वेन नियोक्ष्यामि । किन्तु भवते यावत् वेतनं दीयते तस्य अर्धभागः एव तस्मै दास्यते मया । यदि एतत् सम्मतं स्यात् तर्हि श्वः एव सः मम आस्थानपण्डितपदं भूषयतु नाम'' इति ।

बोधिसत्त्वस्य मुखात् एतत् श्रुत्वा मूर्तेशः ईर्ष्याग्रस्तः जातः । सः अचिन्तयत् ''अहं बोधिसत्त्वेन तुल्यः अस्मि एव । तथापि वेतने न्यूनता किमर्थम् ?' इति । ततः सः तद्दिने एव राजानं दृष्ट्वा अवदत्– "महाराज । अल्पेन वेतनेन भवता राजास्थाने मम नियुक्तिः अनुमता इति मया श्रुतम् । पाण्डित्येन अहं गुरुवर्यस्य समानः एव अस्मि । एवं स्थिते अपि वेतने न्यूनता किमर्थम् ?" इति । तदा राजा अवदत् – ''अहं तु गुत्सकस्य शिष्यत्वेन एव भवन्तम् अभिजानामि, न तु तत्तुल्यवैणिकरूपेण । गुरुशिष्ययोः पाण्डित्ये तारतम्यं स्यादेव'' इति ।

''मम सामर्थ्यं परीक्षया ज्ञायताम्'' इति अवदत् मूर्तेशः । ''भवतु नाम । भवतोः उभयोः अपि स्पर्धाम् आयोजयिष्यामि । तत्र यदि भवता गुत्सकतुल्यता प्रमाणीकरिष्यते तर्हि अधिकं वेतनं दास्यामि । यदि तथा कर्तुं न शक्तं तर्हि मम आस्थानं प्रवेष्टुं सर्वथा न भविष्यति भवतः अधिकारः । किम् एतत् अनुमन्यते भवता ?'' इति अपृच्छत् राजा ।

मूर्तेशः एतत् अङ्गीकृतवान् । ततः गुरुशिष्ययोः स्पर्धा आयोजिता जाता । उभौ अपि स्वप्रतिभायाः प्रदर्शनाय प्रयासम् आरब्धवन्तौ । एतदभ्यन्तरे बोधिसत्त्वस्य वीणायाः एका तन्त्रीः विच्छिन्ना । तथापि तस्य वीणावादनं तु अक्षुण्णम् एव अनुवृत्तम् । एतत् दृष्ट्वा मूर्तेशः स्वस्य वीणायाः एकां तन्त्रीं स्वयं त्रोटयित्वा वीणाम् अवादयत् ।

किञ्चित्कालानन्तरं बोधिसत्त्वस्य वीणायाः अपरा तन्त्रीः अपि छिन्ना । मूर्तेशः अपि स्वस्य वीणायाः अपरां तन्त्रीं बलात् एव अच्छेदयत् । किञ्चित्कालाभ्यन्तरे गुत्सकस्य वीणायाः सर्वाः अपि तन्त्र्यः विच्छिन्नाः जाताः । मूर्तेशः अपि स्वस्य वीणायाः सर्वाः तन्त्रीः बलात् अच्छेदयत् ।

गुत्सकः तु छिन्नाभ्यः तन्त्रीभ्यः अपि स्वरम् उत्पादयति स्म । किन्तु मूर्तेशः तथा कर्तुं न शक्तवान् ।

एतत् दृष्टवन्तः जनाः गुत्सकस्य प्रशंसां बहुधा कृतवन्तः, मूर्तेशस्य च उपहासम् अकुर्वन् ते ।

मूर्तेशः एतम् अपमानं सोढुं न शक्तवान् । सः झटिति उत्थाय आस्थानात् निर्गतवान्, तस्मिन् एव दिने उज्जयिनीं प्रतिगतवान् च ।

## मासवार्ता:

### सम्पन्नः भव्यः 'संस्कृत-लिटरेचर-फेस्टिवल' कार्यक्रमः



एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानं, संस्कृत-साहित्य-अकादमी इत्येतेषां संयुक्तोपक्रमेण डिसेम्बरमासस्य ३०, ३१ दिनाङ्कयोः अहमदाबादनगरे सम्पन्नः भव्यः 'संस्कृत-लिटरेचर-फेस्टिवल' कार्यक्रमः। 'भारतीय-ज्ञान-परम्परा' (Indian Knowledge System) इति विषयम् अधिकृत्य 'संस्कृत-लिटरेचर-फेस्टिवल' इति कार्यक्रमस्य द्वितीयायाम् आवृत्त्याम् संस्कृत साहित्यम् अधिकृत्य विविधानि व्याख्यानानि आयोजितानि आसन्। आयोजनेऽस्मिन् 'सा विद्या या विमुक्तये' इति विषये स्वामी श्रीपरमात्मानन्दः सरस्वती (अध्यक्षः, हिन्दु-धर्म-आचार्यसभा) 'भारतीय ज्ञान परम्परा की वैज्ञानिकता' इति विषये डॉ. नीरजा गुप्ता (कुलपतिः, गुजरातविश्वविद्यालयः), 'भारतीय साहित्य और प्रकृति' इति विषये डॉ. भाग्येशः ज्हा (अध्यक्षः, गुजरात-साहित्य-अकादमी), 'Ayurveda knowledge Dilivery System: Eternal & Sophisticated' इति विषये डॉ. भवदीपः गणात्रा (आयुर्वेदाचार्यः) 'यज्ञ का वैज्ञानिक स्वरूप' इति विषये आचार्यः बालकृष्णः दवे (प्रधानाचार्यः, श्री स्वामि-गोविन्ददेवगिरि वेद-संस्कृतमहाविद्यालयः), 'The Vastusastras of Western India' इति विषये श्री स्नेहलः शाहः (न्यासी, नवगुजरात एज्युकेशन ट्रस्ट) 'उत्तररामचरित मे कर्तव्यबोध' इति विषये डॉ. वसन्तकुमारः भट्टः (पूर्वनियामकः, भाषा-साहित्य-भवनम्, गुजरातविश्वविद्यालयः), 'संस्कृत नाटकों में जीवनोपयोगी ज्ञानपरंपरा' इति विषये डॉ.

कमलेशकुमारः चोकसी (पूर्वनियामकः, भाषा-साहित्य-भवनम्, गुजरातविश्वविद्यालयः, 'संस्कृत नाटकों में शिक्षण' इति विषये डॉ. अमृतलालः भोगायता (प्रधानाचार्य, ब्रह्मर्षि-संस्कृत-महाविद्यालयः, नडियादम्) 'भारतीय-परम्परा और शिक्षापद्धति' इति विषये डॉ. चान्द-किरणः सलूजा (न्यासी, संस्कृत-संवर्धन-प्रतिष्ठानम्, देहली), 'भारतीय-परम्परा का सागर-महाभारत' इति विषये अमी गणात्रा च मनोहराणि व्याख्यानानि अकुर्वन्। अत्र उल्लेखनीयं यत् रात्रीकार्यक्रमे ३० दिनाङ्के 'संस्कृतयात्रा' इति नृत्यनाटिकायाः प्रयोगः ३१ दिनाङ्के 'प्रबुद्धभारतम्' इति नृत्यनाटिकायाः प्रयोगः अभवत्। कार्यक्रमेऽस्मिन् भागं स्वीकृत्य संस्कृतरसिकाः प्रसन्नाः आसन्।

## ॥ दूरभाषस्तोत्रम् ॥

कविश्रीराजेशठाकरः

ॐ अस्य श्रीदूरभाषस्तोत्रमहामन्त्रस्य नारद ऋषिः। मनुष्यो देवता। स्वच्छन्दच्छन्दः। जाग्रत्सुषुप्तिपिञ्जिका (Switch On Off) कवचम्। (Sim) बीजम्। पुनर्नवा (Recharge) शक्तिः। तारकं कीलकम्। ब्रह्माण्डसम्पर्कसिद्ध्यर्थं वृत्तकाले (Talk Time) जपे व्यये (Bill) च विनियोगः॥

सुदूरवर्तिनो जनाञ्जनैः समं सुयोजयन्
समीपवर्तिनो जनाञ्जनैर्पुनर्वियोजयन्।
विचित्रचित्रचित्रकर्मदक्ष! शक्तिमन्! प्रभो!
मनुष्यचित्तरञ्जकाय दूरभाष! ते नमः॥०१॥

विदिक्षु दिक्षु सर्वकारसूचनानि सूचयन्
विदेशदेशवृत्तवर्तनानि मङ्क्षु बोधयन्।
क्वचिन् महार्हमूल्यवान् क्वचिच्च चाल्पमूल्यवान्
जनैः समादृतो भवान् करे करे विराजते॥ ०२॥

नितान्तकान्तकामिनीकरेण सत्कृतो भवान्
तदीयपाण्डुगण्डकर्णयोश्चरन् सुशोभते।
तदोष्ठयुग्मचुम्बनेन चार्चितः पुनः पुनः
कृती त्वमेव दूरभाष! हा! हता वयं पुनः॥ ०३॥

अभीष्टवस्तु दर्शयन् नृणां मनांसि हर्षयन्
अनेकमाध्यमात् पुनर्नवं नवं प्रशिक्षयन्।
त्वमेव हन्त सार्वभौमतामहत्त्वमाकलन्
गृहे गृहे कृतास्पदः करे करे विराजसे॥०४॥

विदूरदूरदेशगः स्वकीयबान्धवस्मृतेः
विदूयमानमानसो नरो यदा भवेत्तदा।
तवैव कारणात् पुनर्निजैः प्रियैर्जनैः समं
चलत्कथो जनः क्षणाद् गलद्व्यथो विधीयते॥०५॥

प्रगे पुरा त्वमेव चक्षुषां पथि प्रयास्यथो
तवैव दर्शनं विधाय सुप्तिमेति मानवः।
सुदर्शनीय! दिव्यरूप! देवतायते! भवान्
मनुष्यचित्तरञ्जकाय दूरभाष ते नमः॥०६॥

महानसे तवाश्रयान्नवीनपाकपद्धतिं
प्रशिक्ष्य योषितां गणैः पतिव्रजः प्रसाद्यते।
क्वचिद्दुच्छिशुं प्रसान्त्वयन् पुरः पुरस्कृतो
विभाति दूरभाष! लोकरञ्जनक्षमो भवान्॥०७॥

विवाहपर्वणो दिने विशिष्टशर्मणो दिने
समुन्नतेर्दिने तथा सदुत्सवे जनुर्दिने।
स्वकीयबन्धुना मुदा स्वकीयबन्धवे भवान्
उपायनीकृतः करे धृतश्चिरं निरीक्ष्यते॥०८॥

त्वदीयकाचपट्टले स्फुरत्प्रभालसत्तले
स्वकाङ्गुलीर्नुदन् नुदन्नभीप्सितं निभालयन्।
विना जपं विना तपो विना विशिष्टसत्क्रियां
धरातले स्थितः स्थितोऽपि नाकसौख्यमेत्यसौ॥०९॥

भवन्तु नाम केचन त्वदीयनिन्दका बकाः
त्वयि श्लथादरा नरा ऋतं विजानते न ते।
सुसुष्ठु कर्मयोजितो विवेकतः प्रयोजितो
मदीयचेतसे पुनर्भवानतीव रोचते॥१०॥

## कृपया हसन्तु

रमण: - (वैद्यम् उद्दिश्य) किं भवान् तथा दन्तान् निष्कासयितुं शक्नोषि येन रुग्ण: किञ्चिदपि पीडाम् न अनुभवेत् ।

वैद्य: - न, अहं तथा कर्तुं न शक्नोमि । रुग्ण: किञ्चित् तु पीडाम् अनुभवति एव ।

रमण: - किन्तु अहं पीडया विना दन्तान् निष्कासयितुं शक्नोमि ।

वैद्य: - कथम् ?

रमण: - ही... ही... ही... ही...

★ ★ ★ ★ ★

नमन: - (रमणं प्रति ) भो: रमण ! तव मस्तके व्रण: कथं जात: ?

रमण: - अहं मम पादरक्षया पाषाणं त्रोटयन् आसम् ।

नमन: - किन्तु अत्र मस्तकं कुत: आगतम् ?

रमण: - तत: गच्छन् कश्चन जन: मां दृष्ट्वा अवदत् - "भो:, मस्तके स्थिताया: बुद्ध्या: प्रयोगम् अपि करोतु" इति ।

★ ★ ★ ★ ★

आरक्षक: - (चालकम् उद्दिश्य) त्वया मार्गनियमस्य भङ्ग: कृत: वर्तते । अत: दण्ड: दातव्य: भविष्यति । वद... तव नाम किम् ?

चालक: - याज्यल्कवल्लचदास: मारानुक्नस्मीजणचार्य: युयुत्सु: ।

आरक्षक: - अस्तु, अद्य त्यजन् अस्मि । अवधानेन यानं चालय नियमान् च सम्यक् पालय ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**प्रशमश्च क्षमा चैव आर्जवं प्रियवादिता ।**
**असामर्थ्यफला ह्यन्ते निर्गुणेषु सतां गुणाः ।**

**तात्पर्यम्** – शान्तिः, क्षमागुणः, सरलता, मधुरभाषणम् – एते सज्जनानां सद्गुणाः भवन्ति। किन्तु दुष्टाः एते दुर्बलतायाः लक्षणानि इति मन्यन्ते।

**प्रस्तावसदृशं वाक्यं सद्भावसदृशं प्रियम् ।**
**आत्मशक्तिसमं कोपं कुर्वाणो नावसीदति ॥**

**तात्पर्यम्** – सन्दर्भोचितं वचनं यः वदति, उत्तमभावानुगुणं सत्कार्याणि यः करोति, स्वस्य सामर्थ्यानुगुणं यः कुप्यति सः कदापि अधोगतिं न प्राप्स्यति।

**प्राप्यापदं न व्यथते कदाचिदुद्योगमन्विच्छति चाप्रमत्तः ।**
**दुःखं च काले सहते महात्मा धुरन्धरस्तस्य विपद्विनश्येत् ॥**

**तात्पर्यम्** – आपतौ व्यथां न अनुभवतः, कार्ये प्रमादं न आचरतः, दुःखं धैर्येण सहतः महात्मनः सर्वाः विपत्तयः विनष्टाः भवन्ति।

## ज्ञानसरित्

श्यामः पटेलः

**निद्रायाः द्वारम् इव जृम्भणम् !** – लोके यदा कश्चन मनुष्यः जृम्भणं करोति तदा प्रायः जनाः तम् 'अहो कुम्भकर्ण !' इत्युक्त्वा परिहसन्ति। किन्तु किं भवन्तः जानन्ति यत् कुतः आयाति जृम्भणम् ? आगम्यताम्। अवगच्छाम।

श्रमेण श्रान्तः मनुष्यः जृम्भते इति सामान्यम्। किन्तु जृम्भणस्य आगमनं प्रायः आलस्यं दर्शयति। यद्यपि विज्ञानिनः जृम्भणस्य आगमनस्य कारणं स्पष्टतया नावगतवन्तः तथापि तैः शोधानुगुणम् उद्घोषितं यत् यदा मनुष्यः श्रान्तः भवति तदा तस्य स्नायवः शिथिलतां प्राप्नुवन्ति। ततः श्वसनस्य मात्रा न्यूना भवति । यदा मनुष्यः प्रतिनिमेषं ६ तः ७ लीटरमितं यावत् वायुं श्वसिति तदा पर्याप्तं प्राणवायुं प्राप्नोति। प्राणवायोः अत्यावश्यकता मस्तिष्के भवति। श्रान्तः मनुष्यः पर्याप्तं श्वसनं कर्तुं न शक्नोति । अतः प्राणवायोः अल्पत्वात् तस्य मस्तिष्कं तन्द्रताम् आप्नोति । तन्द्रतायाः सङ्केतं प्रदातुमेव मस्तिष्कं जृम्भणं सम्प्रेष्य अधिकं प्राणवायुं श्वसितुं सूचयति। जृम्भणस्य अवधिः प्रायः पञ्चक्षणात्मको भवति। तदा मनुष्यः दीर्घं श्वसनं करोति। तस्मिन् अवसरे नेत्रेन्द्रियं श्रोत्रेन्द्रियं च स्वकार्यात् विरमतः। जृम्भणावसरे वयं श्रोतुं न शक्नुमः इति अस्माभिः अनुभूतं स्यात्।

वस्तुतः तु जृम्भणम् अस्माकं शरीरं तन्द्रामुक्तं कृत्वा पुनः क्रियान्वितं करोति । तथा च निद्रायाः आतिथ्यमपि निर्दिशति। भवतु नाम, दीर्घलेखनश्रान्तत्वात् जृम्भमाणोऽहमपि विरमामि अत्र।

जृम्भणम् – kyawning, श्रान्त – exhausted

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **विश्रम्भः** | विश्वास | trust |
| **निर्यातः** | निकला हुआ | gone out |
| **आपत्कालः** | आपत्तिकाल | emergency |
| **इच्छुः** | इच्छुक | desirous |
| **मनस्तापः** | मानसिक पीडा | mental distress |
| **प्रशमः** | उपशम | calmness |
| **प्रचण्डः** | प्रचंड | vehement |
| **हायनम्** | वर्ष | year |
| **तुषारः** | बर्फ | ice |
| **प्रयोजनम्** | प्रयोजन | use |
| **विषादः** | दुःख | grief |
| **प्रसादः** | आनन्द | delight |
| **तनुः** | पतला | slender |
| **काञ्चनम्** | स्वर्ण | gold |
| **नगरद्वार** | गोपुरम् | town gate |

## किं भवन्तः जानन्ति ?

**१ ) एतेषु कः पितुः वृद्धत्वं स्वीकृत्य तस्मै यौवनं प्रायच्छत् ?**
(क) पुरुः (ख) भरतः (ग) प्रतीपः (घ) भीष्मः

**२ ) असुराणां संहाराय कः ऋषिः स्वस्य अस्थिदानम् अकरोत् ?**
(क) दुर्वासाः (ख) विश्वामित्रः (ग) वाल्मीकिः (घ) दधीचः

**३ ) एतेषु कः देवः रावणस्य भ्राता आसीत् ?**
(क) कुबेरः (ख) वरुणः (ग) यमः (घ) इन्द्रः

**४ ) एतेषु कः रावणं बद्ध्वा कारागारे स्थापितवान् आसीत् ?**
(क) रामः (ख) दशरथः (ग) सहस्रार्जुनः (घ) कृतवीर्यः

**५ ) एतेषु कस्य हस्तेन अर्जुनः एकवारं मृत्युं प्राप्तवान् आसीत् ?**
(क) जयद्रथस्य (ख) बभ्रुवाहनस्य (ग) कर्णस्य (घ) सात्यकेः

**६ ) कौ लक्ष्मणं, हनुमन्तं, भरतं, शत्रुघ्नं च युद्धे पराजितवन्तौ ?**
(क) वालिसुग्रीवौ (ख) लवकुशौ (ग) नलनीलौ (घ) खरदूषणौ

**७ ) एतेषु कः पितुः आज्ञया मातुः शिरः छिन्नवान् आसीत् ?**
(क) नचिकेताः (ख) विश्वामित्रः (ग) लक्ष्मणः (घ) परशुरामः

उत्तराणि – (१) क (२) घ (३) क (४) ग (५) ख (६) ख (७) घ

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY

## स्तोत्रपाठः
## ( निश्चितस्तोत्राणि )

**Date :** 01/02/24 to 05/03/24
**Day :** Tuesday-Thursday
**Time :** 6:30pm to 08:00pm
**Fees :** 2500/-

## छन्दःपरिचयः

**Date :** 11/03/24 to 03/04/24
**Day :** Wednesday-Friday
**Time :** 6:30pm to 08:00pm
**Fees :** 2500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

EKLAVYA SANSKRIT ACADEMY

**Online / Offline**

**Admission Open**

## संस्कृतभाषाशिक्षणम्

**First Level**

**Date :** 08/01/24 to 29/03/24
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

EKLAVYA SANSKRIT ACADEMY

**Online / Offline**

**Admission Open**

## संस्कृतभाषाशिक्षणम्

**Third Level**

**Date :** 08/01/24 to 29/03/24
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

## संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू - 100
द्वैवार्षिकं रू - 175
त्रैवार्षिकं रू - 250
अङ्कमूल्यं रू - 10

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006